# Shiv Tandav Stotram

Sanskrit · Devanagari source script · Latin rendering available

॥अथ सुसंशुद्धं रावणकृतशिवताण्डवस्तोत्रम्॥

॥श्रीगणेशाय नमः॥

जटाऽटवीगलज्जलप्रवाहपावितस्थले गलेऽवलम्ब्य लम्बितां
भुजङ्गतुङ्गमालिकाम्।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥
१॥

||atha susaṃśuddhaṃ rāvaṇakṛtaśivatāṇḍavastotram||

||śrīgaṇeśāya namaḥ||

jaṭā'ṭavīgalajjalapravāhapāvitasthale gale'valambya lambitāṃ
bhujaṅgatuṅgamālikām|
ḍamaḍḍamaḍḍamaḍḍamanninādavaḍḍamarvayaṃ cakāra
caṇḍatāṇḍavaṃ tanotu naḥ śivaḥ śivam ||1||

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरीविलोलवीचिवल्लरीविराजमानमूर्द्धनि।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥
२॥

jaṭākaṭāhasambhramabhramannilimpanirjharīvilolavīcivallarīvirājamān
amūrddhani|
dhagaddhagaddhagajjvalallalāṭapaṭṭapāvake kiśoracandraśekhare ratiḥ
pratikṣaṇaṃ mama ||2||

धराधरेन्द्रनन्दिनीविलासबन्धुबन्धुरस्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि क्वचिद्दिगम्बरे मनो विनोदमेतु वस्तुनि ॥
३॥

dharādharendranandinīvilāsabandhubandhurasphuraddigantasantatipr
amodamānamānase|
kṛpākaṭākṣadhoraṇīniruddhadurdharāpadi kvaciddigambare mano
vinodametu vastuni ||3||

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभाकदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे।
मदान्धसिन्धुरासुरत्वगुत्तरीयमेदुरे मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥४॥

jaṭābhujaṅgapiṅgalasphuratphaṇāmaṇiprabhākadambakuṅkumadravap
raliptadigvadhūmukhe|
madāndhasindhurāsuratvaguttarīyamedure mano vinodamadbhutaṃ
bibhartu bhūtabhartari ||4||

सहस्रलोचनप्रभृत्यशेषलेखशेखरप्रसूनधूलिधोरणीविधूसराङ्घ्रिपीठभूः।
भुजङ्गराजमालया निबद्धजाटजूटकः श्रिये चिराय जायतां चकोरबन्धुशेखरः ॥
५॥

sahasralocanaprabhṛtyaśeṣalekhaśekharaprasūnadhūlidhoraṇīvidhūsar
āṅghripīṭhabhūḥ|
bhujaṅgarājamālayā nibaddhajāṭajūṭakaḥ śriye cirāya jāyatāṃ
cakorabandhuśekharaḥ ||5||

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभानिपीतपञ्चसायकं
नमन्निलिम्पनायकम्।
सुधामयूखलेखया विराजमानशेखरं महः कपालि सम्पदे सरिज्जटालमस्तु नः
॥६॥

lalāṭacatvarajvaladdhanañjayasphuliṅgabhānipītapañcasāyakaṃ
namannilimpanāyakam|
sudhāmayūkhalekhayā virājamānaśekharaṃ mahaḥ kapāli sampade
sarijjaṭālamastu naḥ ||6||

करालभालपट्टिकाधगद्धगद्धगज्ज्वलद्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रकप्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥
७॥

karālabhālapaṭṭikādhagaddhagaddhagajjvaladdhanañjayāhutīkṛtapracaṇ
ḍapañcasāyake|
dharādharendranandinīkucāgracitrapatrakaprakalpanaikaśilpini
trilocane ratirmama ||7||

नवीनमेघमण्डलीनिरुद्धदुर्धरस्फुरत्कुहूनिशीथिनीतमःप्रबन्धबद्धकन्धरः।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः कलानिधानबन्धुरः श्रियं जगद्धुरन्धरः
॥८॥

navīnameghamaṇḍalīniruddhadurdharasphuratkuhūniśīthinītamaḥprab
andhabaddhakandharaḥ|
nilimpanirjharīdharastanotu kṛttisindhuraḥ kalānidhānabandhuraḥ
śriyaṃ jagaddhurandharaḥ ||8||

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभाऽवलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम्।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं गजच्छिदान्धकच्छिदं तमन्तकच्छिदं
भजे ॥९॥

praphullanīlapaṅkajaprapañcakālimaprabhā'valambikaṇṭhakandalīrucip
rabaddhakandharam|
smaracchidaṃ puracchidaṃ bhavacchidaṃ makhacchidaṃ
gajacchidāndhakacchidaṃ tamantakacchidaṃ bhaje ||9||

अखर्वसर्वमङ्गलाकलाकदम्बमञ्जरीरसप्रवाहमाधुरीविजृम्भणामधुव्रतम्।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं गजान्तकान्धकान्तकं
तमन्तकान्तकं भजे ॥१०॥

akharvasarvamaṅgalākalākadambamañjarīrasapravāhamādhurīvijṛmbh
aṇāmadhuvratam|
smarāntakaṃ purāntakaṃ bhavāntakaṃ makhāntakaṃ
gajāntakāndhakāntakaṃ tamantakāntakaṃ bhaje ||10||

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वसद्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट्।
धिमिद्धिमिद्धिमिद्ध्वनन्मृदङ्गतुङ्गमङ्गलध्वनिक्रमप्रवर्तितप्रचण्डताण्डवः शिवः
॥११॥

jayatvadabhravibhramabhramadbhujaṅgamaśvasadvinirgamatkramasph
uratkarālabhālahavyavāṭ|
dhimiddhimiddhimiddhvananmṛdaṅgatuṅgamaṅgaladhvanikramaprava
rtitapracaṇḍatāṇḍavaḥ śivaḥ ||11||

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्रजोर्गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः समप्रवृत्तिकः कदा सदाशिवं
भजाम्यहम् ॥१२॥

dṛṣadvicitratalpayorbhujaṅgamauktikasrajorgariṣṭharatnaloṣṭhayoḥ
suhṛdvipakṣapakṣayoḥ|
tṛṇāravindacakṣuṣoḥ prajāmahīmahendrayoḥ samapravṛttikaḥ kadā
sadāśivaṃ bhajāmyaham ||12||

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन् विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं
वहन्।
विमुक्तलोललोचनाललामभाललग्नकं शिवेति मन्त्रमुच्चरन् कदा सुखी
भवाम्यहम् ॥१३॥

kadā nilimpanirjharīnikuñjakoṭare vasan vimuktadurmatiḥ sadā
śiraḥsthamañjaliṃ vahan|
vimuktalolalocanālalāmabhālalagnakaṃ śiveti mantramuccaran kadā
sukhī bhavāmyaham ||13||

निलिम्पनाथनागरीकदम्बमौलमल्लिकानिगुम्फनिर्भरक्षरन्मधूष्णिकामनोहरः।
तनोतु नो मनोमुदं विनोदिनीमहर्निशं परश्रियः परं पदं तदङ्गजत्विषां चयः ॥
१४॥

nilimpanāthanāgarīkadambamaulamallikānigumphanirbharakṣaranma
dhūṣṇikāmanoharaḥ|
tanotu no manomudaṃ vinodinīmaharniśaṃ paraśriyaḥ paraṃ padaṃ
tadaṅgajatviṣāṃ cayaḥ ||14||

प्रचण्डवाडवानलप्रभाशुभप्रचारणी महाष्टसिद्धिकामिनीजनाऽवहूतजल्पना।
विमुक्तवामलोचनाविवाहकालिकध्वनिः शिवेति मन्त्रभूषणा जगज्जयाय
जायताम् ॥१५॥

pracaṇḍavāḍavānalaprabhāśubhapracāraṇī
mahāṣṭasiddhikāminījanā'vahūtajalpanā|
vimuktavāmalocanāvivāhakālikadhvaniḥ śiveti mantrabhūṣaṇā
jagajjayāya jāyatām ||15||

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसन्ततम्।
हरे गुरौ सुभक्तिमाशु याति नाऽन्यथा गतिं विमोहनं हि देहिनां सुशङ्करस्य
चिन्तनम् ॥१६॥

imaṃ hi nityamevamuktamuttamottamaṃ stavaṃ
paṭhansmaranbruvannaro viśuddhimetisantatam|
hare gurau subhaktimāśu yāti nā'nyathā gatiṃ vimohanaṃ hi dehināṃ
suśaṅkarasya cintanam ||16||

पूजावसानसमये दशवक्त्रगीतं यः शम्भुपूजनपरं पठति प्रदोषे।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां लक्ष्मीं प्रसादसमये प्रददाति शम्भुः ॥

॥ इति रावणकृतं शिवताण्डवस्तोत्रं सम्पूर्णम् ॥

pūjāvasānasamaye daśavaktragītaṃ yaḥ śambhupūjanaparaṃ paṭhati
pradoṣe|
tasya sthirāṃ rathagajendraturaṅgayuktāṃ lakṣmīṃ prasādasamaye
pradadāti śambhuḥ ||

|| iti rāvaṇakṛtaṃ śivatāṇḍavastotraṃ sampūrṇam ||

## Source & edition

Complete selected 16-numbered-stanza edition, followed by an unnumbered concluding prayer and colophon. Other editions number15 stanzas; this source variant is preserved, not silently harmonized. No English meaning layer.

Sanskrit Wikisource contributors (transcription); classical composition attribution recorded separately. शिवताण्डवस्तोत्रम्, revision 418608. CC BY-SA 4.0.

The source spellings are retained. Reading blocks and the Latin rendering help you follow the text; these adaptations are also CC BY-SA4.0.

Edition ws-418608-b11303b9d8.